# Shri Sharadamatri Stuti

# श्रीशारदामातृस्तुतिः

## Document Information

Text title : Shri Sharadamatri Stuti

File name : shAradAmAtRRistutiH.itx

Category : deities_misc, gurudev, rAmakRiShNa, stuti

Location : doc_deities_misc

Author : Bhandarakara Tryambakasharmana

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीशारदामातृस्तुतिः

श्री-रामकृष्णमय जीवन सर्वसारा
साराधनाखिलजनेषु दया प्रसारा ।
लोकप्रसूर्विजितजैत्रमनो विकारा
श्रीशारदा विजयते जगदात्मरूपा ॥ १॥

सा-म्बां नितान्तमिह सत्त्वगुणप्रधानां
भक्त्या स्वयं भगवता परिपूजितां च ।
दीक्षाप्रदानविमलीकृतभक्तचित्त
चिन्तासहस्रपरिहारपरां नमामः ॥ २॥

र-मां केशवस्याप्युमां शूलपाणेः
परा मुक्तिदां भक्तिमार्गप्रचाराम् ।
सदाचारमूर्तिं शिवां विश्ववन्द्यां
नमामीश्वरीं सारदां शारदां ताम् ॥ ३॥

दा-क्षिण्यभावपरिपूरित निर्मलान्तां
तां लोकसङ्ग्रहकृते सगुणस्वरूपाम् ।
लोकातिगां स्वयं जातिगुण प्रकारां
सन्मातरं मुहुरहं शिरसा नतोऽस्मि ॥ ४॥

मा-र्तण्डदीप्तिरथ दाहकशक्तिरग्नेः
स्वाधारतो न पृथगर्हति गन्तुमेवम् ।
एकात्मतामुपगताऽखिलकार्यजाते
मातः स्वयं भगवतोऽस्य पृथक् प्रकृत्या ॥ ५॥

तृ-ष्णात्रयज्वलनशोषितमानसानां
नानाविधानकरणैरनिशं जनानाम् ।
या नित्यसान्त्वनपरा विपदो हरन्ती
तां शारदामभयदां शिरसा नमामः ॥ ६॥

स्तु-वन्ति मातर्निखिलाश्रमाणा-
मादर्शभूता त्वमिहैकवारम् ।
स्त्रीभिस्तवांशानुकृतिः कृता चेत्
तज्जीवनं स्यात् सफलं रसायाम् ॥ ७॥

ति-ग्मं गृहीत्वा दुरितं परेषां
कष्टान्वितान्यान् सुखिनः करोषि ।
अलौकिकं ते चरितं जगत्सु
स्वयं शिरस्त्वच्चरणे नतं नः ॥ ८॥

इति भण्डारकरोपाह्वेनत्र्यम्बकशर्मणाविरचिता
“श्रीशारदामातृस्तुतिः” समाप्ता ।

Proofread by Aruna Narayanan

*Shri Sharadamatri Stuti*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*